## षष्ठीयुक्तश्छन्दसि वा। (९/३३८९)

पतिः इति वर्तते। पूर्वेण [1]नियमेन असमासे न प्राप्नोति [2]इति वचनमारभ्यते। षष्ठ्यन्तेन[3] युक्तः पतिशब्दः छन्दसि विषये वा घिसञ्ज्ञो भवति। 'कुलुञ्चानां पतये नमः' (तै.सं. ४.५.३७), कुलुञ्चानां पत्ये नमः[4]। [5]षष्ठीग्रहणं किम्? 'मया पत्या जरदष्टि[6]र्यथासः' (ऋ. १०.८६.३६)। छन्दसि [7]इति किम्? ग्रामस्य पत्ये॥

## ह्रस्वं लघु। (१०/३१)

मात्रिकस्य [8]ह्रस्वसञ्ज्ञा कृता (१.२.२७/४) तस्यानेन लघुसञ्ज्ञा विधीयते। ह्रस्वमक्षरं लघुसञ्ज्ञं भवति। भेत्ता। छेत्ता (७.३.८६/२१८९)। अचीकरत्। अजीहरत् (७.४.१, ९३/२३१४, २३१६)। लघुप्रदेशाः–'पुगन्तलघूपधस्य च' (७.३.८६/२१८९)[9] इत्येवमादयः॥

## संयोगे गुरु। (११/३२)

ह्रस्वम् इति वर्तते। पूर्वेण लघुसञ्ज्ञायां प्राप्तायां गुरुसञ्ज्ञा[10] विधीयते। संयोगे परतो ह्रस्वमक्षरं गुरुसञ्ज्ञं भवति।[11]कुण्डा। हुण्डा। [12]शिक्षा। भिक्षा (३.३.१०३/३२८०)। गुरुप्रदेशाः–'गुरोश्च हलः' (३.३.१०३/३२८०) इत्येवमादयः॥

## दीर्घं च। (१२/३३)

संयोगे इति नानुवर्तते। सामान्येन [13]सञ्ज्ञाविधानम्। दीर्घं [14]चाक्षरं गुरुसञ्ज्ञं भवति। ईहाञ्चक्रे। [15]ईक्षाञ्चक्रे (३.१.३६/२२३७)॥

## यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्। (१३/१९९)

यस्मात् प्रत्ययो विधीयते धातोर्वा प्रातिपदिकाद् वा तदादि शब्दरूपं प्रत्यये परतोऽङ्गसञ्ज्ञं भवति। [16]कर्ता। हर्ता। करिष्यति। हरिष्यति। [17]अकरिष्यत् (७.३.८४/२१६८)। औपगवः। [18]कापटवः (७.२.११७/१०७५)। यस्मात् इति [19]सञ्ज्ञिनिर्देशार्थम्, तदादि इति सम्बन्धात्। प्रत्ययग्रहणं किम्? न्यविशत। व्यक्रीणीत। 'नेर्विशः' (१.३.१७/२६८३) इत्युपसर्गाद् विधिरस्ति, तदादेरङ्गसञ्ज्ञा स्यात्। विधिग्रहणं किम्? [20]प्रत्ययपरत्वमात्रे मा भूत्। स्त्री इयती (म.भा. १.३१५)।

[५५] तदादिवचनं स्यादिनुमर्थम्। (म.भा. १.३१६)

---

1. नियमात् क.फ, नियमो न प्राप्नोति ह. 2. इतीदं फ.ह. 3. शब्देन इत्यधिकम् क.ड.ह. 4. क्षेत्रस्य पतये नमः। क्षेत्रस्य पत्ये नमः इत्यधिकम् ड. 5. षष्ठीयुक्तः अ. 6. यथासत् ह. 7. इति नास्ति ड. 8. अचः इत्यधिकम् अ.क.ड.ह. 9. दीर्घो लघोः (7.4.81/2317) इत्यधिकम् अ.क. 10. अनेन इत्यधिकम् क.फ.ह. 11. कुण्डा हुण्डा नास्ति अ, हुण्डा नास्ति ब. 12. शिक्षा नास्ति फ. 13. सञ्ज्ञाविधाने अ, सामान्येन सञ्ज्ञाविधानम् नास्ति ब. ई, सामान्येन विधानमेतत् ह. 14. च नास्ति फ. 15. ऊहांचक्रे अ. क. 16. कारकः फ, हर्ता नास्ति फ, हरिष्यति नास्ति ह. 17. नास्ति अ.ब. 18. नास्ति फ. 19. सन्धि° ह. 20. प्रत्यय नास्ति फ.ह.